# वाक्यपदीयदिशा जयकृष्णकृतसारमञ्जर्य्याः कर्तृत्वविमृष्टिः

प्रियाङ्का साहा

प्रबन्धविषयसंकेतः: जयकृष्णकृतसारमञ्जर्य्यां कारकादीनि विविधगुरुत्वोपेतानि तत्त्वानि आलोचितानि। तत्र षड्कारकाणि जयकृष्णेण विस्तरेण व्याख्यातं दर्शनमूलके अस्मिन् ग्रन्थे। तत्र कर्तृकारकालोचनावसरे तस्य लक्षणप्रसङ्गे उक्तम्- 'क्रियानुकूलकृतिमत्त्वं कर्तृत्वम्'। अतः कर्तृलक्षणघटकीभूता क्रिया का इति शिष्यजिज्ञासानन्तरं क्रियालक्षणं निरूपितं शिष्यावधानाय।

अस्मिन् प्रबन्धे प्रथमैव स्वतन्त्रशब्दस्य अर्थद्वयं व्याख्यातम्। स्वातन्त्रमन्तरेण कर्तृसंज्ञा असम्भवा एव। क्रियासिद्धौ सर्वेषां व्यापारे सत्यपि स्वातन्त्रं यस्य विवक्षितः स कर्ता। कर्तुरप्रवृत्ते सर्वेषामपि कारकाणाम् अतिप्रवृत्ते'पि न क्रियासिद्धिः तस्य षड्कारणात्। अप्रतिनिधिः कर्ता महाभाष्ये तदीयग्रन्थकारेण विस्तरशो आलोचितम्। प्रयोज्यकर्तुः विषये वार्तिककारेण रचितं वार्तिकं सर्वैव निष्प्रयोजनमिति प्रदीपोद्यतकारेण शास्त्रे पुङ्खानुपुङ्खरूपेण व्याख्यातम्। 'स्वतन्त्रः' इति पदेन प्रयोज्यकर्तुः संज्ञा ईष्यते।

'साधकतमं करणम्' इति सूत्रे तमप्प्रत्ययेन न केबलं सर्वाधारस्य ग्रहणं स्यात्, अपि च प्रयोजकस्य कर्तुरपि भेदद्वयस्य कर्तृसंज्ञा सिद्धौ तस्य प्रयोजनम् उदाहरणक्रमेण प्रबन्धे स्पष्टीकृतम्।

कुञ्चिशब्दः- कर्तृत्वम्, वाक्यपदीयम्, सारमञ्जरी, जयकृष्णः, महाभाष्यम्।

वाक्यपदीयदिशा जयकृष्णकृतसारमञ्जर्य्याः कर्तृत्वविमृष्टिः

अन्नंभट्टाचार्येण तस्य 'तर्कसंग्रहः' इति ग्रन्थे कर्तुः लक्षणप्रसङ्गे उक्तम्- 'उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वं कर्तृत्वम्'[1] । अपरोक्षमिति प्रत्यक्षम्। कर्तुमिच्छा चिकीर्षा। 'कृति' शब्देन प्रयत्नो द्योत्यते। कार्यस्य कर्ता स एव यस्य कार्यस्य कारणविषयं प्रत्यक्षज्ञानमस्ति, चिकीर्षा प्रयत्नश्चास्ति। यथा घटकारणविषये प्रत्यक्षज्ञाने सति, घटनिर्माणेच्छा तदुपयोगिनः प्रयत्नस्य च वर्तमानत्वे घटं प्रति कर्तृत्वं भवति।

को नाम स्वतन्त्रः: आचार्येण जयकृष्णेण कर्तृकारकस्य लक्षणप्रसङ्गे उक्तम्- 'क्रियानुकूलकृतिमत्त्वं कर्तृत्वम्'[2]। आचार्येण पाणिनिना कर्तृकारकप्रसङ्गे उल्लिखितं सूत्रं 'स्वतन्त्रः कर्ता' (पा. सू. 1/4/54) इति। कर्तृसंज्ञाविधायकं सूत्रमिदम्। स च कर्ता द्विविधः स्वतन्त्रो हेतुश्च। हेतुः प्रयोजक इति। प्रयोज्यकर्तापि स्वतन्त्र इति।

अत्र स्वतन्त्रशब्दस्यार्थनिर्णयप्रसङ्गे प्रदीपकारेणाक्षिप्यते यत् किं स्वतन्त्रः तन्तुवाय एव तस्य स्वतन्त्रशब्दवाच्यत्वादिति। यथा विततः तन्तवः यः तन्त्रम्। स्वतन्त्रशब्दस्यार्थद्वयं वर्तते- विततः तन्तवः इति स्वतन्त्रं स्वं तन्त्रमस्यास्तीति स्वतन्त्रः। तन्तुवायेऽर्थे स्वतन्त्रशब्दस्य विशेषज्ञानम्। पदमञ्जर्यां तदीयग्रन्थकारेणोक्तं 'स्वं धनं तन्त्रं साधारणमस्य स्वतन्त्रः, अस्ति च प्रधानवचनः- स्व आत्मा तन्त्रं प्रधानमस्य स्वतन्त्र इति'[3]। कुतः तन्तुवायो वयति भुनक्ति इत्यादौ तन्तुवायस्य कर्तृत्वेऽपि तस्य अपादानादिसंज्ञापि भवति यथा तन्तुवायाद् गृह्णाति इत्यादौ। अत्र तन्त्रं प्रधानमित्यर्थः। अर्थात् प्राधान्ये वर्तते तन्त्रशब्दस्यात्र ग्रहणम्। प्रधानभूतोऽगुणभूत इत्यर्थः।

काशिकाकारेणोक्तं- 'अगुणभूतो यः क्रियासिद्धौ स्वातन्त्र्येण विवक्षते तत्कारकं कर्तृसंज्ञं भवति'[4]। किन्तु अत्र प्रश्न उत्थाप्यते यत् यत्र अधिकरणादीनि अप्रधानानि कारकाणि सन्ति तत्र कर्तुः प्राधान्यं स्पष्टम्, यथा काष्ठैः स्थाल्यामोदनं पचतीति। किन्तु यत्र ते न सन्ति यथा देवदत्तः शेते आस्ते इत्यादौ। अत्र अन्येषां कारकाणां प्रविवेको दृश्यते। हरदत्तमिश्रेणोक्तं- 'तेन यस्य गुणभावो नास्ति स कर्ता'। कारकान्तराविवक्षायामपि चागुणभावोऽस्त्येव'[5] । काष्ठादीनि अन्यानि कारकाणि कर्त्रधीनानि। कर्त्रा प्रवर्तितानि काष्ठादीनि करणादिशक्तिं लभन्ते कर्ता तु तेषां प्रागेव शक्तिं लभते। कर्तृसन्निधौ ते न्यग्भवन्ति। तेषां प्रवृत्तिनिवृत्ती कर्तुरधीने। कर्तुः प्रतिनिधिः न दृश्यते अपरपक्षे तु करणादेः प्रति सर्वत्रैव दृश्यते। हेलाराजेनोक्तं- 'स्व आत्मा तन्त्रं प्रधानमस्य। करणादीनां हि परः कर्तैव प्रधानम्। क्रियासिद्धौ तेन प्रयोज्यत्वात्। कर्ता तु अनन्यप्रयोज्यः स्वतन्त्र इत्युच्यते'[6] । क्रियासम्पादने कारकमेवोपकारकम्। कस्यचित् कारकस्य न्यूनतमासहयोगित्वेऽपि क्रिया न निष्पद्यते। सत्यमेतत्। गुणभावो यत्र नास्ति स कर्ता। एषां य स्वतन्त्रः स एव कर्ता। यस्याप्रवृत्तत्वादन्येषामपि कारकाणां क्रियासम्पादने उपयोगित्वेऽपि क्रियायाः

निष्पत्तिर्न भवति तस्यैव स्वातन्त्रम्। अन्येषां कारकाणां प्रवृत्तिनिवृत्ती कर्तुरधीने। कारकाणामविवक्षायामपि अगुणभावो'स्यास्तीति। अनेककारकसाध्यायामपि क्रियायां यथा कस्यचित् स्वातन्त्रं तथा कारकसूत्रे प्रतिपादितम्। काशिकाकारेणोक्तं- 'अगुणभूतो यः क्रियासिद्धौ स्वातन्त्रेण विवक्ष्यते तत् कारकं कर्तृसंज्ञं स्यात्।'[7] कर्ता एव क्रियासम्पादनाय मुख्याश्रय इति, स एव अन्येषां कारकाणां नियन्ता सकलकारकप्रवर्तकत्वात् कर्तुः प्राधान्यम्। अगुणभावेन प्राधान्येन स्वातन्त्रेण विवक्षित इति। 'गुणभावो यत्र नास्ति स कर्तेति'[8] न्यासकारः। अतः स्वतन्त्रः य सकलकारकप्रवर्तक एव। महाभाष्यकारेणोक्तं- 'किं यस्य स्वं तन्त्रं स स्वतन्त्रः'[9]। स्व आत्मा तन्त्रं प्रधानं यस्य स स्वतन्त्र उच्यते'[10] इति कैयटः। काशिकाकारेणोक्तं- 'स्वतन्त्र इति प्रधानभूत उच्यते'[11]।

किन्तु सर्वेषां कारकाणां कर्तुः स्वातन्त्रत्वे'पि क्रियया सह तस्य विप्रकृष्टत्वात् स आरादुपकारको भवति। यथा 'देवदत्तः कुठारेण काष्ठं छिनत्ति' इत्युदाहरणे छेदनक्रियया सह कुठारस्य साक्षात्सम्बन्धः, देवदत्तस्तु कुठारव्यापारेणैव छेदनक्रियया सह सम्बन्धितः। करणस्य कर्ता प्रेरक इति स्वतन्त्रः कर्ता। यद्यपि तिरोधताति तथापि करणप्रवृत्तिहेतुत्वेन कर्तुः प्राधान्यमिति कुलचन्द्रः। अर्थाद् यद्यपि असौ तटे स्थित्वा फलसिद्धौ उपकरोति न तु करणादिवत् क्रियया सह साक्षात्सम्बन्धेन समन्वितः तथापि आरादुपकारित्वादपि तस्य प्राधान्यमुपपन्नम्। अपि च एतत् प्राधान्यं न केवलं चेतनेषु अपि च अचेतनेषु सम्भवति। अत आह 'स्वातन्त्रेण विवक्षित:' इति।

कर्तुः स्वातन्त्रम्: 'स्वं तन्त्रं यस्य स स्वतन्त्रः'[12] इति न्यासकारः। 'प्रधानीभूतधात्वर्थाश्रयत्वं स्वातन्त्रम्'[13] इति तत्त्वबोधिनीकारः। स्वातन्त्रं प्राधान्यमिति स्पष्टम्। कारकाधिकारात् क्रियासिद्धौ प्राधान्यस्योपयोगात् प्रधानवाची स्वतन्त्र इति शब्दः। सुतरां, यदि कर्तुः क्रियया सह साक्षात्संबन्धो न भवति तर्हि कथं स 'स्वतन्त्रः' इति पदेनोच्यते। उत्तररूपेण वाक्यपदीयकारेणोक्तम्-

'प्रागन्यतः शक्तिलाभान् न्यग्भावनादपि।
तदधीनप्रवृत्तित्वात् प्रवृत्तानां निवर्तनात्।।
अदृष्टत्वात् प्रतिनिधेः प्रविवेके च दर्शनात्।

आराद्प्युपकारित्वे स्वातन्त्रं कर्तुरुच्यते।।[14]

योआत्मना अन्येषां कारकाणां नियामकरूपेण क्रियां सम्पादयति स एव स्वतन्त्रः कर्ता इति। क्रियासिद्धौ सर्वस्य एव व्यापारो'स्ति, यतः सामग्र्यधीना हि क्रियासिद्धिः, तर्हि कथं कर्तुरेव? तत्रोच्यते क्रियासिद्धौ सर्वेषां व्यापारे सत्यपि स्वातन्त्रं यस्य विवक्ष्यते स एव स्वतन्त्र इति उच्यते। अन्येषां कारकाणां वर्तमानत्वे'पि क्रियासम्पादने यो अङ्गीभूतः स एव स्वतन्त्रः कर्ता इति दिक्। हेलाराजेन षड्कारकाणि प्रदर्शितानि। कर्ता पूर्वमेव शक्तिमान् इति प्रथमः, करणादीनां कर्तृविनियोगाद् न ते स्वतन्त्रास्ते द्वितीयः, कर्ता तु न्यग्भावमात्माधीनतामिति तृतीयः, पुनः फलकामो हि कर्ता इति चतुर्थः, स फलार्थमीहमानः स्वयं व्यापारवान् इति पञ्चमः, अतः अतिप्रवृत्तानि च करणादीनि निवर्त्यन्ते कर्ता इति सर्वशेषः। कर्तुरप्रवृत्ते सर्वेषामपि कारकाणाम् अतिप्रवृत्ते'पि न क्रियासिद्धिः। स तु फलप्राप्तौ स्वयमेव निवर्त्यते। करणादीनां प्रतिनिधिरस्ति, किन्तु क्रियानिवृत्तौ कर्तुः प्रतिनिधिः निष्प्रयोजनः। कर्तुः प्रति असम्भव एव। अन्येषां कारकाणामभावे'पि कर्तुरवस्थानं नासम्भवः। अतः भाष्यकारेणोक्तम्- 'यत् सर्वेषु साधनेषु सन्निहितेषु कर्ता प्रवर्तयिता भवति'[15]। संक्षेपेण यत् साक्षात्कियाश्रयः, स्वक्रियासिद्धौ कारकाणां प्रवर्तकः पदार्थः कर्तृकारकमिति इति उच्यते। पदार्थ इत्यनेन द्योत्यते यत् चेतन एव क्वचित् कर्मणि स्वक्रियरूपेण नियामकरूपेण स्वातन्त्रेण वा प्रवर्तको भवति, न तु जाड्यः। तर्हि स्थाली पचति काष्ठाणि पचन्ति वा इत्यादयः स्थले कथं स्थाल्यादेः कर्तृत्वम्? इत्याक्षेपेण दीक्षितेनोक्तम्- 'क्रियायाः स्वातन्त्रेण विवक्षितो'र्थः कर्ता स्यात्'[16]। अर्थात् चेतनाचेतनयोर्वा को'पि कर्ता स्यात्, योग्यतासत्त्वादसत्त्वादपि वा। यदा अचेतनः को'पि कर्ता इति बोध्यते तदा कर्तृत्वं वक्त्रा आरोपितः स्यात्। विवक्षावशात् कारकाणि भवन्ति।

अत्र अवश्यरूपेण स्मरणीयं यत् कर्तृकर्मादिकारकाणि सर्वाणि एव वक्तुः विवक्षाधीनानि, अतः एकैव पदार्थो विविधरूपेण उपस्थाप्यते। फलतो नास्ति को'पि विरोधः। हेलाराजेनोक्तम्- 'एवं तनुतनुकपालत्वात् स्थाली पाके अनपेक्षितकर्तृविनियोगात् स्वातन्त्रेण विवक्षित इति कर्ता वास्तवाधारविवक्षायां तु अधिकरणत्वमिति सर्वमुपपद्यते'[17]। स्वातन्त्रेण य क्रियां करोति इति स कर्ता, तथा च

पाणिनेः 'स्वतन्त्रः कर्ता'। किं नाम स्वातन्त्र्यम्? पराप्रयोज्यत्वं स्वातन्त्र्यम्, कर्तृत्वोपपत्तिः, न तु प्रयोज्यकर्तुः कर्तृत्वानुपपत्तिरिति। प्रयोज्यकर्तुः कर्तृत्वापत्तिवत् कर्मणोरपि कर्तृत्वापत्तिः स्यात्। यथा पच् धातोः विक्लित्त्यनुकूलव्यापारो'र्थो वाच्यः, तत्त्वं च कर्तरि एव, न तु कर्मणि, विक्लित्तिरूपस्य फलस्य एव कर्मणि वृत्तेः, तदुक्तम्-

'धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते।
व्यापारे च प्रधानत्वात् स्वतन्त्रमिति चेष्यते।।

प्रयोज्यस्य कर्तृसंज्ञाविमृष्टिः : हेतुमति अर्थात् हेतुरस्ति यस्य स प्रयोज्य इत्यर्थः। तस्य अस्वतन्त्रत्वात् किं कर्तृत्वमनुपपन्नम्? नेति। यथा कर्तृसन्निधौ करणादीनां स्वातन्त्र्यं नास्ति तथा न प्रयोजकसन्निधौ प्रयोज्यस्य पारतन्त्र्यात् स्वातन्त्र्याभावात् कर्तृसंज्ञायाः अप्रसङ्ग इति प्रश्नः। 'प्रयोजकसन्निधाने'पि प्रयोज्यस्य करणादिसाधनविनियोगादिना स्वातन्त्र्यस्य क्रियासिद्धौ सद्भावाद्' इति कैयटः। प्रयोजककर्तुः सन्निधाने'पि प्रयोज्येन कर्त्रा सकलकारकप्रवर्तकत्वात् स्वातन्त्र्यभावः इष्यते। 'यो हि मन्यते नासौ स्वतन्त्रः' इति भाष्यकारोक्तन्यायेन प्रयोजकस्य स्वातन्त्र्यमनुपपद्यते। अपि तु प्रयोज्यस्य यद्यपि स्वातन्त्र्यं न स्यात् नैव च असौ साधनान्तरविनियोगादिना क्रियां कुर्य्याद् अर्थात् अकुर्वति अपि प्रयोजकः प्रयोज्ये कारयतीति न्यायेन तस्य कर्तृत्वमिष्टम्। स्वक्रियासम्पादनेन सकलकारकप्रवर्तकरूपस्वातन्त्र्यम् अस्यास्त्येव परप्रेर्यत्वे'पि कारकान्तरविनियोगेन क्रियासाधकत्वमेव हि स्वातन्त्र्यम्'[18] इति उद्योतः। अस्मिन् प्रसङ्गे वार्त्तिककारेणोक्तम्- 'स्वतन्त्रस्य कर्तृसंज्ञायां हेतुमत्युपसंख्यानमस्वतन्त्रत्वात्। न वा स्वातन्त्र्याद् इतरथा ह्यकुर्वत्यपि कारयतीति स्यात्'[19]। प्रयोज्यकर्तुः स्वातन्त्र्येण उपसंख्यानमतिव्यापकमिति। अर्थात् असौ कर्ता उपसंख्यानलभ्यकर्तृसंज्ञकः स्वतन्त्र इति। प्रयोज्यकर्तरि पुनः स्वतन्त्रपदमनुवर्त्य तस्य कर्तृसंज्ञा सुनिश्चिता।

किन्तु पूर्वपक्षिणा पुनः आक्षिप्तं यद् अनेन उपसंख्यानेन प्रयोजकेन अनुप्रेरितस्य कुर्वतः स्वातन्त्र्यम् अकुर्वतः नेति। उपसंख्यानवादयः प्रयोज्यस्य स्वातन्त्र्यमस्तीति वदन्ति। अतस्तेन इदमवश्यमभ्युपगन्तव्यं यत् यः करोति स स्वतन्त्रः तु यः अकुर्वन्नास्ति तस्य स्वातन्त्र्यमिति। किन्तु एतन्न भवति। यत् प्रयोजकसन्निधाने'पि स्वार्थदर्शनात् प्रयोज्यकरोति नान्यथेति तस्य स्वातन्त्र्यमस्त्येव।

यदि च प्रेषिते प्रयोज्यः न करोति स्वार्थदर्शनादिच्छायामसत्यां तत्रापि तस्य स्वातन्त्रं प्रतिपादितम्। अतः अस्य उपसंख्यानस्य नास्ति प्रयोजनमिति उद्योतकारः। अत्र 'प्रेषिते' पदे सप्तमी कर्तृनिष्ठत्वात्। अर्थाद् यः करोति स एव स्वतन्त्रः परप्रयुक्तो'पि। ततः उपसंख्यानस्यास्य नास्ति प्रयोजनमिति भावः। 'स्वतन्त्रः कर्ता' इति सूत्रेणैव शुद्धकर्तुरपि प्रयोज्यकर्तुः कर्तृत्वमुपपन्नम्।

उदाहरणरूपेण विषयमेतत् स्पष्टीकृतम्- 'पाचकः पचति' इत्यत्र पाचकः स्वतन्त्रः कर्ता, स्वाधीनतया कर्मसम्पादनात्। किन्तु 'प्रभुः पाचकेन अन्नं पाचयति' इति वाक्ये प्रभुः पाचकं पाककर्मणि प्रवृत्तं करोतीति सत्यम्। किन्तु पाचकस्याप्रवृत्तत्वेन पाकक्रिया न सम्पादिता भवेत्। पाककर्मणः सहायककर्तृकारकाणां तु पाके एव नियामकः, न तु प्रभुरिति। अतः पाचकस्य प्रयोज्यत्वे'पि तस्य कर्तृत्वमुपयुज्यते। यः क्रियां सम्पादयति स एव कर्ता, क्रियासम्पादनाय स्वातन्त्राद् मुख्यनियामकाद्वा। यस्यासत्त्वे अन्येषां सत्त्वादपि क्रिया न सम्पादिता, प्रयुक्तो'प्रयुक्तो वा तस्यैव कर्तृतेष्यते- 'प्रवृत्ताप्रवृत्तौ वा कारकाणां यः ईश्वरः। अप्रयुक्तः प्रयुक्तो वा स कर्ता नाम कारकम्।।' साधनान्तरविनियोगेन क्रियासाधकत्वमेव हि स्वातन्त्रम्। यः करोति स स्वतन्त्रः न तु अकुर्वन्निति। एवं चेत् प्रयोजकसन्निधाने'पि स्वार्थदर्शनात् प्रयोज्यः करोति नान्यथेति तस्य स्वातन्त्रेमस्त्येव। तर्हि प्रयोज्यस्वक्रियानिष्पादनात्तस्य कर्तृतेष्यते इति नियतः। तर्हि 'प्रभुः पाचकेन अन्नं पाचयति' इत्युदाहरणे प्रयोज्यकर्तुः पाके स्वातन्त्रेमस्त्येव, वेतनादिलाभरूपस्वार्थसिद्धये एव तस्य प्रवृत्तेः।

प्रयोजकस्य कर्तृसंज्ञासाधनम्: स्वतन्त्रशब्दः कर्तृसंज्ञाविशिष्टः। कर्तृसंज्ञायां न कश्चित् पदार्थविशेषः नियतः। यस्यैव स्वातन्त्रं सैव कर्ता। तत्शब्देन अव्यवहितपूर्वसूत्रोक्तस्य कर्तुः परामर्शो भवति। तस्य कर्तुः प्रयोजकः प्रवर्तको वा तत्प्रयोजक इति। यथा कटं करोतीति वाक्ये लकारेण यस्य पदार्थस्य स्वातन्त्ररूपेण विवक्षा भवति स स्वतन्त्रः कर्तापि कटं कुर्वानं प्रयुङ्क्ते इति वाक्ये णिच्प्रत्ययेन यस्य परामर्शो भवति स हेतुः लकारेण च तस्य कर्तृसंज्ञा इष्टा। सूत्रे चकारेण कर्तृसंज्ञायाः समावेशो भवति।

यदि क्रियासम्पादने मुख्यकार्यकारिता साक्षात्क्रियाकारित्वं वा स्यात् कर्तृत्वं

तर्हि स्वयं यो क्रियां न निष्पादयति, क्रियाकारित्वे तु प्रयोजयति स एव हेतुकर्ता, तथा च पाणिनिः 'तत्प्रयोजको हेतुश्च' (पा.सू. 1/4/55)। अतः कर्ता द्विविधः- स्वतन्त्रकर्ता हेतुकर्ता च। यो आत्मना स्वतन्त्रकर्तां कर्मे प्रयोजयति स एव हेतुकर्ता इति पाणिनिसूत्रनिर्देशात्।

प्रयोजकः प्रेरक उपदेशको व्यापारको वेति काशिकाकारः। प्रयोजकेन प्रयुज्यमानस्य स्वातन्त्रं कथमपि न हीयते इति महाभाष्ये'पि स्पष्टम्। यदन्यथा अकुर्वतीति। प्रयोजकत्वं द्विविधम- मुख्यमुपचरितञ्च। 'देवदत्तः कटं कारयति' इत्यत्र देवदत्तस्य प्रयोजकत्वं मुख्यम्। 'साधकतमं करणम्' इति सूत्रे तमप्प्रत्ययग्रहणेन न केवलमभिव्यापकस्य परं तु द्वयोरप्याधारयोः अधिकरणसंज्ञा स्यात्। यद्यपि करणलक्षणे तमप्प्रत्ययस्यासत्त्वे'पि अधिकरणलक्षणे तमप्प्रत्ययाभावे'निष्टो भवति। आधारेषु व्याप्याधार एव श्रेष्ठः, सर्वात्मकत्वात्, बृहत्वाच्च। अतः तमप्प्रत्ययस्याग्रहणे'पि यदि तस्यार्थो गृह्यते तर्हि व्याप्याधारमन्तरेण द्वयोरधिकरणत्वमप्रसिद्धम्। किन्तु तन्न भवति। अत्रापि 'साधकतमं करणम्' इति सूत्रबलेन यस्य प्रयोजकमुपचरितं न मुख्यम्, तस्यापि हेतुसंज्ञा भवेत्।[20]

'भिक्षा वासयति 'इत्युदाहरणे भिक्षायाः वासहेतुत्वात् प्रयोजकत्वं गौणम्। अतः न्यासकारेणोक्तम्- 'भिक्षा वासयतीत्यत्र भिक्षाणां वासहेतुत्वात् प्रयोजकत्वमुपचारितम्, न मुख्यम्'। 'साधकतमं करणम्' इति सूत्रबलेन भिक्षायाः गौणप्रयोजकत्वे'पि हेतुसंज्ञा भवति'।

आलोच्यसूत्रेण प्रयोजकस्य हेतुसंज्ञा कर्तृसंज्ञा च भवति। अतःपरः 'हेतुमति च' (पा. सू. 3/1/26) इति सूत्रेण धातोः णिच् स्यात्। उक्तसूत्रे हेतुः अर्थात् प्रयोजककर्ता आधारतया अस्यास्तीति हेतुमान् प्रयोजकः, प्रयोजकनिष्ठः प्रेषणादिव्यापारः, तस्मिन् हेतुमतीति। अस्मिन् प्रसङ्गे दीक्षितेनोक्तम्- 'प्रयोजकव्यापारे प्रेषणादौ वाच्ये धातोः णिच् स्यात्'[21]। यथा 'यज्ञदत्तः देवदत्तेन पाचयति' इत्युदाहरणे पाकक्रियायां देवदत्तो मुख्यकर्ता, तस्य प्रेरकः प्रयोजको वा यज्ञदत्तः। 'तत्प्रयोजको हेतुश्च' इत्यनेन यज्ञदत्तस्य प्रयोजकत्वं मुख्यम्। अत्र हेतुनिष्ठप्रयोजकः प्रेषणादौ व्यापारे वाच्यत्वात् 'हेतुमति च' इत्यनेन धातोः णिच् स्यात्। 'प्रेषणादि' इत्यत्र आदिपदस्य व्याख्या बालमनोरमायां उदाहरणसहयोगेन

व्याख्यातं दीक्षितेन। अत्र विशेषेण स्मर्तव्यं यत् प्रयोजककर्तुरप्रयोगे न णिच् स्यात्। यथा 'कुलालः घटं करोति'। बालमनोरमाकारेण उक्तम्- 'प्रयोज्यप्रयोजकोभयसमभिव्याहार एव तत्प्रवृत्तिरित्यन्यत्र विस्तरः।'[22]

उपसंहृतिः: 'सारमञ्जरी'ति ग्रन्थे आचार्येण जयकृष्णेण तत्पूर्वाचार्यभवानन्द-सिद्धान्तवागीशमनुसृतम्। यतः ग्रन्थो'यं दार्शनिकग्रन्थानामन्यतमः। सारमञ्जरी वाक्यपदीयस्य अल्पकालपरवर्तिनी, अतस्तं ग्रन्थं दर्शनशास्त्रालोकेन व्याख्यातुमाचार्येण वाक्यपदीयमनुसृतम्। कर्तृकारकस्य लक्षणप्रसङ्गे आचार्येण उक्तं लक्षणं सम्पूर्णरूपेण स्वतन्त्रमेव। कर्तृकारकलक्षणं व्याख्यानाय महाभाष्यम् अधिकं प्रयोजनशास्त्रमिति विवेच्य तदालोकेन चेष्टितं मया।

## पादटीका

1. तर्कसंग्रहः, कारिका 17।
2. सारमञ्जरी, कारिका 41।
3. काशिका, 295।
4. काशिका, 295।
5. काशिका, 295।
6. वाक्यपदीयम् 3/7/101-102।
7. काशिका, पा. सू. 1/4/54।
8. काशिका, पा. सू.1/4/54।
9. महाभाष्यम्, पा. सू. 1/4/54।
10. महाभाष्यम्, पा. सू. 1/4/54।
11. काशिका, पा. सू.1/4/54।
12. काशिका, पा. सू.1/4/54।
13. वैयाकरणसिद्धान्तकौमुदी, पा. सू. 1/4/54।
14. वाक्यपदीयम्, 3/7/101-102।
15. महाभाष्यम्, पा. सू. 1/4/54।
16. वैयाकरणसिद्धान्तकौमुदी, पा. सू. 1/4/54।
17. वाक्यपदीयम् 3/7/3।
18. महाभाष्यम्, पा. सू. 1/4/54।

19. वार्तिकम्, 1123-1124।
20. काशिका, पा. सू. 1/4/54।
21. वैयाकरणसिद्धान्तकौमुदी, पा. सू. 3/1/26।
22. वैयाकरणसिद्धान्तकौमुदी, पा. सू. 3/1/26।

## ग्रन्थपञ्जी


- अन्नंभट्टः। 'तर्कसंग्रहः'। सम्पादकः- नारायणचन्द्र गोस्वामी। सटीकः। कलिकाता;संस्कृत पुस्तक भाण्डार। 1413 शकाब्दः। मुद्रितम्।
- सम्पादकः- निरञ्जनस्वरूपो ब्रह्मचारी। कलिकाता; संस्कृत वुक् डिपो। 2005 खिस्टाब्दः। मुद्रितम्।
- करः, गङ्गाधरः। 'शब्दार्थ सम्बन्ध समीक्षा'। कलिकाता; संस्कृत पुस्तक भाण्डार। 2003 खिस्टाब्दः। मुद्रितम्।
- जयकृष्णः। 'सारमञ्जरी'। सम्पादकः- श्रीमद्गुरुनाथविद्यानिधिभट्टाचार्यः श्रीकालिपदतर्काचार्यः च। सारदीपिकाटीकासमन्विता। कलिकाता; छात्रपुस्तकालय। 1935 खिस्टाब्दः। मुद्रितम्। त्रिपाठी, श्रीरामलग्नः। 'पाणिनीय प्रदीप'। काशी; ज्योतिष प्रकाश। 1661 खिस्टाब्दः। मुद्रितम्।
- देवशर्मा, कालीजीवनः। 'शब्दशास्त्रेर इतिहास' कलिकाता; रामकृष्णमिशन इनस्टिटिउट अव कालचार। 1995 खिस्टाब्दः। मुद्रितम्।
- पतञ्जलिः। 'व्याकरणमहाभाष्यम्'। सम्पादकः- श्री भार्गव शास्त्री जोशी। दिल्ली; चौखम्बा संस्कृत प्रतिष्ठान। 2014 खिस्टाब्दः। मुद्रितम्।
- पाणिनि। 'अष्टाध्यायी'। सम्पादकः- तपनः शङ्करः भट्टाचार्यः। कलिकाता; संस्कृत वुक डिपो। 2012 खिस्टाब्दः (द्वितीयसंस्करणकालः) (प्रथमसंस्करणकालः 2004)। मुद्रितम्।
- भट्टोजिदीक्षितः। 'वैयाकरणसिद्धान्तकौमुदी' (प्रथमः खण्डः)। सम्पादकः- महामहोपाध्यायो गिरिधरशर्मन् महामहोपाध्यायः परमेश्वरानन्दशर्मन् च। दिल्ली; मोतिलाल वनारसीदास। 1965 खिस्टाब्दः (द्वितीयसंस्करणकालः) (प्रथमसंस्करणकालः 1961)। मुद्रितम्। 'वैयाकरणसिद्धान्तकौमुदी'। सम्पादकः- विष्णुपदो भट्टाचार्यः। कलिकाता; संस्कृत पुस्तक भाण्डार। 1974 खिस्टाब्दः। मुद्रितम्।
- भर्तृहरिः। 'वाक्यपदीयम्' (ब्रह्मकाण्डम्)। सम्पादकः- रघुनाथ शर्मा। वाराणसी; 1963 खिस्टाब्दः। मुद्रितम्।
- महामहोपाध्यायः, नागेशभट्टः। 'महाभाष्यप्रदीपोद्यतः'। सम्पादकः- रामचन्द्रात्मजो

बालगोविन्दशर्मा च। काशी, 1684 ख्रिस्टाब्दः। मुद्रितम्।

- वामनजयादित्यौ। 'काशिका' (द्वितीयो भागः)। सम्पादकः- ड. जयशङ्करः लालः त्रिपाठी ड. सुधाकरः मालवीयः च। न्यास-पदमञ्जरी-भावबोधिनीसहिता। वाराणसी; तारा बुक् एजेन्सि। 1986 ख्रिस्टाब्दः। मुद्रितम्।
- https://chaukhambapustak.com/index.php?route=product/product&product_id=1319

❋ ❋ ❋